# Shri Gananatha Stuti Kartaviryakrita

# કાર્તવીર્યકૃતા શ્રીગણનાથસ્તુતિઃ

## Document Information

Text title : Shri Gananatha Stuti Kartaviryakrita

File name : gaNanAthastutiHkArtavIryakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 34 | 3.34. 28-40||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# કાર્તવીર્યકૃતા શ્રીગણનાથસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
કાર્તવીર્ય ઉવાચ ।
નમસ્તે ગણનાથાય વિઘ્નેશાય નમો નમઃ ।
વિનાયકાય દેવેશ સર્વેષાં પતયે નમઃ ॥ ૨૮॥
નિર્ગુણાય પરેશાય પરાત્પરતરાય વૈ ।
અનાદયે ચ સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૨૯॥
સર્વપૂજ્યાય હેરમ્બ દીનપાલાય તે નમઃ ।
બ્રહ્મણે બ્રહ્મણાં ચૈવ બ્રહ્મદાત્રે નમો નમઃ ॥ ૩૦॥
નિરાકારાય સાકારરૂપાય પરમાત્મને ।
યોગાય યોગદાત્રે તે શાન્તિરૂપાય વૈ નમઃ ॥ ૩૧॥
સદા જ્ઞાનઘનાયૈવ કર્મમાર્ગપ્રવર્તિને ।
આનન્દાય સદાનન્દકન્દરૂપાય તે નમઃ ॥ ૩૨॥
રજસા સૃષ્ટિકર્ત્રે તે સત્ત્વતઃ પાલકાય ચ ।
તામસેન પ્રસંહર્ત્રે ગુણેશાય નમો નમઃ ॥ ૩૩॥
નાનામાયાધરાયૈવ નાનામાયાવિવર્જિત ।
માયિભ્યો મોહદાત્રે વૈ માયામાયિક તે નમઃ ॥ ૩૪॥
સ્વાનન્દપતયે તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે ચ લમ્બોદર નમોઽસ્તુ તે ॥ ૩૫॥
કિં સ્તૌમિ ગણનાથ ત્વાં યત્ર વેદા વિસિસ્મિરે ।
શિવવિષ્ણ્વાદયશ્ચૈવ યોગિનો યોગરૂપિણમ્ ॥ ૩૬॥
જગાદ ગણનાથસ્તુ તતસ્તં ભક્તમુત્તમમ્ ।
વરં વૃણુ મહાભાગ કાર્તવીર્ય હૃદીપ્સિતમ્ ॥ ૩૭॥
(ફલશ્રુતિઃ)
ગણનાથ ઉવાચ ।
ત્વયા કૃતં મદીયં યત્ સ્તોત્રં સર્વપ્રદં ભવેત્ ।

અઙ્ગહીનસ્ય સર્વસ્ય સ્વઙ્ગદં પ્રભવિષ્યતિ ॥ ૩૮॥
કૃત્વા ભાવેન મત્પૂજાં નરઃ સ્તોત્રમિદં પઠેત્ ।
તસ્ય સાઙ્ગં સદા સર્વં કરોમિ સ્તોત્રપાઠતઃ ॥ ૩૯॥
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ પુત્રપૌત્રાદિસંયુતઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૪૦॥

ઇતિ કાર્તવીર્યકૃતા શ્રીગણનાથસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૪ । ૩.૩૪। ૨૮-૪૦॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 34 . 3.34. 28-40..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Gananatha Stuti Kartaviryakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*